## प्रस्थोत्तरपदपलद्यादिकोपधादण् । (११०/१३३१)

प्रस्थोत्तरपदात् पलद्यादिभ्यः ककारोपधात् च प्रातिपदिकाद् अण् प्रत्ययो भवति शैषिकः । उदीच्यग्रामलक्षणस्य अञोऽपवादः । [1]माद्रीप्रस्थः । माहकीप्रस्थः । पलद्यादिभ्यः – पालदः । [2]पारिषदः । ककारोपधात् – नैलीनकः । [3]चैयातकः । पलद्यादिषु यो वाहीकग्रामः, ततः ठञ्ञिठयोः (४.२.११७/१३४१) अपवादः । यथा – गौष्ठी, [4]नैतकी इति । गोमतीशब्दः पठ्यते, ततो 'रोपधेतोः प्राचाम्' (४.२.१२३/१३४७) इति वुञोऽपवादः । वाहीकशब्दः कोपधोऽपि पुनः पठ्यते परं छं (४. २. ११४/१३३७) बाधितुम् । अण्ग्रहणं बाधकबाधनार्थम् ।

पलदी । [5]परिषत् । [6]यकृल्लोमन् । रोमक । कालकूट । पटच्चर । वाहीक । [7]कलकीट । मलकीट । कमलकीट । [8]कमलभिदा । गोष्ठी । कमलकीर । बाहुकीट । नैतकी । परिखा । शूरसेन । [9]गोमती । उदयान । पलद्यादिः ॥

## कण्वादिभ्यो गोत्रे । (१११/१३३२)

गोत्रमिह न प्रत्ययार्थो न [10]च प्रकृतिविशेषणम् । [11]तर्ह्येवं [12]सम्बध्यते, कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितः, तदन्तेभ्य [13]एव अण् प्रत्ययो भवति शैषिकः । छस्यापवादः । [14]काण्वाः छात्राः । [15]गौकक्षाः[16] ॥

## इञश्च । (११२/१३३३)

गोत्रे इत्येव । गोत्रे य इञ् विहितः तदन्तात् प्रातिपदिकात् अण् प्रत्ययो भवति शैषिकः । छस्यापवादः । दाक्षाः । प्लाक्षाः । [17]माहकाः । गोत्रे इत्येव, सौतङ्गमेरिदं सौतङ्गमीयम् ॥

## न द्व्यचः प्राच्यभरतेषु । (११३/१३३४)

द्व्यचः प्रातिपदिकात् प्राच्यभरतगोत्राद् इञन्ताद् अण् प्रत्ययो [18]न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । पैङ्गीयाः । प्रौष्ठीयाः । [19]चैदीयाः । [20]पौष्कीयाः । [21]काशीयाः । पाशीयाः । द्व्यचः इति किम् ? पान्नागाराः[22] । प्राच्यभरतेषु इति किम् ? दाक्षाः[23] । काशीयाः इति कथमुदाहृतं, यावता काश्यादिभ्यष्ठञ्ञिठाभ्यां (४.२.११६/१३४०) भवितव्यम् ? नैतदस्ति । देशवाचिनः काशिशब्दस्य तत्र ग्रहणं [24]चैदिशब्देन साहचर्यात् । गोत्रात् तु वृद्धाच्छः (४. २. ११४/१३३७) एव भवति । ज्ञापकादन्यत्र [25]प्राच्यग्रहणेन भरतग्रहणं न भवति इति स्वशब्देन भरताना[26]मुपादानं कृतम् ॥

---

1. माध्रीप्रस्थः ब, राध्रीप्रस्थः क. 2. पार्षदः ब.क.इ. 3. नैयानकः ब, वैयानकः क. इ, वैरयातकः ह. 4. नैलकी ब. 5. पार्षदी ब, पार्षद क. 6. पक्षरोमक ब. 7. जालकीट क. 8. कमललीब कमलकी इत्यधिकम् ब. 9. नास्ति अ.क. ड. इ. 10. च नास्ति क, न विधिविशेषणम् इत्यर्थः फ. 11. किम् इत्यधिकम् ब. क. फ. इ. 12. अभिसंबध्यते क, एवं सम्बन्धः क्रियते फ. 13. एव नास्ति फ. 14. शाकटाः ड. 15. वौकक्षाः क. 16. गोत्रे इति किम् ? कण्वो देवता अस्य काण्वः, तस्य इदं काण्वीयम् इत्यधिकम् ब, गर्गाद्यन्तर्गणोऽयम् इत्यधिकम् क. ड. इ. फ. ह. 17. माहकालाः फ, साहकाः क. 18. न नास्ति फ. ह. 19. बैदीयाः फ, बैकीयाः ड. 20. पौष्पीया. क. फ. ड. 21. वाशीयाः क, वात्स्याः ड. 22. माथरेषणाः इत्यधिकम् फ, मान्तरेषणाः इत्यधिकम् ह. 23. प्लाक्षाः इत्यधिकम् ब. क. ड. फ. 24. चेदिशब्देन ब. क. ड फ, बैदिशब्देन ह. 25. प्राच्यग्रहणे ब. फ. इ. 26. ग्रहणम् फ. ह.